क्षीरेन्द्रियैश्चन्द्रौ च जराजर्ज्जरिते हितम् ।
क्षीणानाञ्चनरीणाञ्च गर्भस्थितिकरं परम् ॥
एतदङ्गवरं तैलं विष्णुना परिकीर्त्तितम् ॥”
लवङ्गः । गोरचतण्डुलः । हयमोहेऽवलोकण्ट-
कार्य्यौ । पूतिको नाटाकरञ्जः । चक्रपर्णी
भिण्डी । अत्र क्वाथान्तराभावात् क्षीरस्य
चतुर्गुणं जलं कश्चिद्ददाति ।
“स्नेहमन्धीरमाङ्गल्यैः पाको यत्रेरितः क्वचित् ।
जलं चतुर्गुणं तत्र वीर्य्याधानार्थमारपेत् ॥”
इति परिभाषावचनात् ॥
क्वचिदिति पाठात् क्वाथान्तररहिते केवल-
क्षीरादिसहिततैलादियाके ज्ञातव्यं न तु सर्व्वत्र ।
“एलाचन्दनकुङ्कुमागुरुसराकक्कोलमांसीमुरी-
शैलेयाम्बुदग्रन्थिपर्णमुरामृदनृधीकमोषी-
रकम् ।
कस्तूरीनखपूतिशैलजलसहमेथीलवङ्गादिकं
गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु ॥”
अथ बृहद्विष्णुतैलम् ।
“जलधरमञ्जनगन्धाजीवकर्षभकौ शटी ।
काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका ॥
मधूरिका देवदारु पद्मकाष्ठञ्च सैन्धवम् ।
मांसी एला त्वचं कुष्ठं रक्तचन्दनशैलजम् ॥
मञ्जिष्ठा नागनाभिश्च श्वेतचन्दनकुङ्कुमम् ।
पर्णी कुन्दुरु चोटिच ग्रन्थिकश्च नखी तथा ॥
एतेषां पलिकैर्भागैस्तैलस्यापि तथाढ़कम् ।
शतावरीरससमं दुग्धञ्चापि समं भवेत् ॥
विष्णुतैलवरं श्रेष्ठं सर्व्ववातविकारहृत् ।
ऊर्द्ध्ववाते ह्यधोवाते अङ्गविग्रह एव च ॥
शिरोमध्यगता ये च मन्या स्तम्भे गलग्रहे ।
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
सर्व्वांस्तान्नाशयत्याशु सूर्य्यस्तम इवोदितः ॥”
इति भैषज्यरत्नावली ॥
विष्णुदैवतं, } त्रि, (विष्णुर्दैवतं देवता वा यस्य ।)
विष्णुदैवत्यं, } विष्णुधिष्ठातृदेवताकम् । यथा,—
“व्रतोपकरणं सर्व्वं कथितं सर्व्वदैवतम् ।
यदत्तु सर्व्वदैवत्यं यदुक्तं द्विजोत्तमाः ।
तज्ज्ञेयं विष्णुदैवत्यं सर्व्वं वा विष्णुदैवतम् ॥”
इति शुद्धितत्त्वे विष्णुधर्म्मोत्तरवचनम् ॥
क्ली, श्रवणानक्षत्रम् । इति ज्योतिषम् ॥
विष्णुदैवत्या, स्त्री, (विष्णुर्दैवतमस्याः ।) एका-
दशीतिथिः । द्वादशीतिथिः । यथा,—
“एकादशी द्वादशी च प्रोक्ता श्रीचक्रपाणिनः ।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी ॥”
इति स्मृतिः ॥
“एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्द्देवता हरिः ॥”
इति तिथ्यादितत्त्वम् ॥
विष्णुधर्म्मः, पुं, (विष्णुप्रधानो धर्म्मोऽस्मिन् ।) शास्त्र-
विशेषः । यथा । “ब्रह्मचारिकाण्डे भविष्य-
पुराणम् ।
‘अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥’
अयत्नेन संसारमिति जयस्तत्तद्ग्रन्थः ।” इति
तिथ्यादितत्त्वम् ॥ ॥ विद्याविशेषः । यथा,—
“अवाप बभ्रु चैन्द्रत्वं विष्णुधर्म्माख्यविद्यया ।
सर्व्वान् शत्रून् विनिर्जित्य ताश्च पश्ये महेश्वर ॥
पादयोर्जानुनोरूर्व्वोरुदरे हृदयोरसि ।
मुखे शिरस्यानुपूर्व्व्याद्योङ्कारादीं विनिर्द्दिशेत् ॥
ॐ नमो नारायणायेति विपर्य्ययमथापि वा ।
करन्यासं ततः कुर्य्यात् द्वादशाक्षरविद्यया ॥
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्व्वसु ।
न्यसेत् हृदय ॐकारं नकारं मम मूर्द्धनि ॥
मोकारन्तु भ्रुवोर्म्मध्ये शिखायाञ्चादिमङ्गतः ।
ॐ विष्णवे नम इति इमं मन्त्रमुदाहरेत् ॥
आत्मानं परमं ध्यायेच्छेषषट्शक्तिभिर्युतम् ।
मम रक्षां ततः कुर्य्यान्मत्स्यमूर्त्तिर्जलेऽवतु ॥
त्रिविक्रमस्तथाकाशे स्थले रक्षतु वामनः ।
अटव्यां नरसिंहस्तु रामो रक्षतु पर्व्वते ॥
भूमौ रक्षतु वाराहो हंसो नारायणोऽवतु ।
कर्म्मबन्धाच्च कापिल्यदत्तो योगात्तु रक्षतु ॥
हयग्रीवो देवतायाः कुमारो मकरध्वजात् ।
नारदोऽन्यार्चनात् पायात् कूर्म्मो वै नैर्ऋतेः
सदा ॥
धन्वन्तरिरपथ्याच्च नागः क्रोधवशात् किल ।
यज्ञलोकाद्बलः कालाद्व्यासो ज्ञानाच्च रक्षतु ॥
बुद्धः पाषण्डसंघातात् कल्किरव्यात् कलेः समम् ।
पायान्मध्ये दिने विष्णुः प्रातर्नारायणोऽवतु ॥
मधुहा चापराह्णे च सायं रक्षतु माधवः ।
हृषीकेशः प्रदोषेऽव्यात् प्रत्यूषेऽव्याज्जनार्द्दनः ॥
श्रीधरोऽव्यादर्द्धरात्रे पद्मनाभो निशान्तके ।
चक्रकौमोदकीबाणाः घ्नन्तु शत्रूंश्च राक्षसान् ॥
शङ्खशब्दश्च शत्रुभ्यः शार्ङ्गो वै गरुडस्तथा ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥
शेषः सर्व्वैर्मुदापन्नः सदा सर्व्वत्र पातु माम् ।
विदिक्षु दिक्षु च सदा नरसिंहश्च रक्षतु ॥
एतद्धारयमाणश्च यं यं पश्यति चक्षुषा ।
स वशी स्यात्रिपाप्मा च रोगामुक्तो दिवं
व्रजेत् ॥”
इति गारुडे २०१ अध्यायः ॥
विष्णुधर्म्मोत्तरं, क्ली, संहिताविशेषः । तत्र प्रश्न-
कर्त्ता जनमेजयसुतः । वक्तारः शौनकाद्या
ऋषयः । तत्र १०० वृत्तान्तास्तद्ग्रन्थे द्रष्टव्याः ॥
विष्णुपञ्जरं, क्ली, (विष्णुरेव पञ्जरमिव यस्मिन् ।
तद्धारयितुर्निर्भयरक्षाकारित्वादस्य तथात्वम् ।)
विष्णुकवचविशेषः । यथा,—
“प्रवक्ष्याम्यधुना त्वेतद्वैष्णवं पञ्जरं शुभम् ।
नमो नमस्ते गोविन्द चक्रं गृह्य सुदर्शनम् ।
प्राच्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ।
गदां कौमोदकीं गृह्य पद्मनाभामितद्युते ॥
याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ।
हलमादाय सौनन्दं नमस्ते पुरुषोत्तम ।
प्रतीच्यां रक्ष मां विष्णो भवन्तं शरणागतम् ॥
पाञ्चजन्यं तथा शङ्खं शार्ङ्गचापञ्च पङ्कजम् ।
प्रगृह्य रक्ष मां विष्णो आग्नेय्यां यज्ञसूकर ॥
चर्म्म सूर्य्यशतं गृह्य खड्गं चन्द्रसमं तथा ।
नैर्ऋत्यां माञ्च रक्षस्व दिव्यमूर्त्ते नृकेशरिन् ॥
वैजयन्तीं प्रगृह्य त्वं श्रीवत्सकण्ठभूषण ।
वायव्यां रक्ष मां देव अश्वशीर्ष नमोऽस्तु ते ॥
वैनतेयं समारुह्य अन्तरीक्षे जनार्द्दन ।
मां त्वं रक्षाजित सदा नमस्तेऽस्त्वपराजित ॥
विशालाक्षं समारुह्य रक्ष मां त्वं रसातले ।
अकूपार नमस्तुभ्यं महामीन नमोऽस्तु ते ॥
करशीर्षाङ्घ्रिपर्व्वेषु तथाष्टबाहुपञ्जरम् ।
कृत्वा त्वं रक्ष मां देव नमस्ते पुरुषोत्तम ॥
एतदुक्तं भगवता वैष्णवं पञ्जरं महत् ।
पुरा रक्षार्थमीशेन कात्यायन्या द्विजोत्तम ॥
यदा सा नाशयामास दानवं महिषासुरम् ।
चामरं रक्तवीजञ्च तथान्यान् सुरकण्टकान् ॥”
इति वामने १७ अध्यायः ॥
विष्णुपदं, क्ली, (विष्णोः पदम् ।) आकाशम् ।
इत्यमरः ॥ (यथा, रघुवंशे । १६ । २८ ।
“वसुन्धराविष्णुपदं द्वितीय-
मध्यारुरोहेव रजश्छलेन ॥”)
क्षीरोदः । इति मेदिनी ॥ पद्मम् । इति हेम-
चन्द्रः ॥ (तीर्थविशेषः । यथा, महाभारते ।
३ । ८३ । ६५ ।
“तत्र विष्णुपदे स्नात्वा अर्च्चयित्वा च वामनम् ।
सर्व्वपापविशुद्धात्मा विष्णुलोकं स गच्छति ॥”
कैलासपर्व्वतस्य स्थानविशेषः । यथा, महा-
भारते । ५ । १११ । २२ ।
“अत्र विष्णुपदं नाम क्रमता विष्णुना कृतम् ॥”
पर्व्वतविशेषः । यथा, हरिवंशे । ३१ । ४३ ।
“तेन विचरयेनाथ तदा विष्णुपदे गिरौ ॥”)
विष्णोः स्थानम् । यथा,
“अपुण्यपुण्योपरमे क्षीणाशेषाप्तिहेतवः ।
यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदम् ॥
धर्म्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः ।
तत्साष्टैश्वर्य्ययोगेद्धास्तद्विष्णोः परमं पदम् ॥
यत्रैतदोतं प्रोतञ्च यद्भूतं सचराचरम् ।
भाव्यञ्च विश्वं मैत्रेय तद्विष्णोः परमं पदम् ॥
दिवीव चक्षुराततं विततं यन्महात्मनाम् ।
विवेकज्ञानदृष्टञ्च तद्धि विष्णोः परं पदम् ॥”
इति विष्णुपुराणे २ अंशे ८ अध्यायः ॥
भ्रूमध्यम् । यथा,—
“अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च ।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्मातृमण्डलम् ॥”
इति काशीखण्डे ४२ अध्याये १३।१४ श्लोकौ ॥
विष्णुपदी, स्त्री, (विष्णोः पदं स्थानं यस्याः ।
गौरादित्वात् ङीष् ।) गङ्गा । इत्यमरः ॥ (यथा,
भागवते । १ । १९ । ७ ।